Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चउदपूर्वधर भगवान् भद्रबाहुस्वामि विरचितः

# स्वप्नाध्यायः

नियकम्मनिम्मयं चिय सुहासुहं पायडंति किर सुत्तिणा। घणतिमिरनियर परिसंठियाणि दव्वाणि दीवव्व॥१॥
गय सीह वग्घ हय वसह नर जुयं वाहनं समारूढो। जो वच्चइ सुमिणं ते पुढवीए होई सो राया ॥२॥
किर नर पासायत्थो जलहिपाउण जो उ बुज्झिज्ज। तह चेव सोऽवि राया होई फुडं जाइरहिओवि॥३॥
धवलगइंदारूढो तडागसीसम्मि सालिदहिकूरं। जो भुंजइ सो वि फुडं नरनाहो होइ पुहवीए ॥४॥
नगनगरगामकाणण सरिसमुद्दं च सुमइ बोहाहिं। उद्धरइ सोऽवि राया होइ फुडं थोव दिवसे हिं॥५॥

निजकर्मनिर्मकमेय शुभाशुभं प्रकटयन्ति किल स्वप्नाः। घनतिमिरनिकर परिसंस्थितानि द्रव्याणि दीप इव ॥१॥
गज सिंह व्याघ्र हय वृषभ नर युगं वाहनं समारूढः। यो गच्छति स्वप्नान्ते पृथिव्या भवति स राजा ॥२॥
किल नर प्रासादस्थो जलधिप्रापनं यस्तु बुध्येत। तथा चैव सोऽपि राजा भवति स्फुटं जाति रहितोऽपि ॥३॥
धवलगजेन्द्रारूढ स्तटाकशीर्षे शालिदधिकूरम्। योभुंक्ते सोऽपि स्फुटं नर नाथो भवति पृथिव्याः ॥४॥
नगनगरग्राम कानन सरित्समुद्रं च सुमति बोधाभिः। उद्धरति सोऽपि राजा भवति स्फुटं स्तोक दिवसैः ॥५॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नियमुत्तपुरीसं सुमिणयम्मि आयड्डिऊण हत्थेहिं । जो किर बुज्झइ पुरिसो रज्जसिरिं सोऽवि पावेइ॥६॥
लिंगभंगसीसछेया नरनारीणं हवंति सुहफलया । सोहग्गभोगसंपयघणा वहा नूणं सुमिणम्मि ॥७॥
आरोविऊण धणुहं जीवरवाउरमाण दिसीचक्कं । जो हणइ सत्तुसिन्नं सो पावइ संपयं विउलं ॥८॥
गयवसहसेलपासाय वरतरुरोहणं किलपसत्थं । रुन्नं विट्ठालेवोअगम्मगमणं च सुमिणम्मि ॥९॥
जो किर दाहिणहत्थे पंडुरवण्णेण खज्जए अहिणा । लहइ सहस्समणूणं दिणान अट्ठण्ह मज्झम्मि॥१०॥
फलगब्भिण खीरदुमं आरूढो तत्थ चेव एगागी । जो बुज्झइ सो तुरियं धणरिद्धिं पावइ सुमिणम्मि॥११॥
विमणो आमं मंसं पायाइसुतह नराण खायंतो । पडिबुज्झइ पंचसए पावइ सीसम्मि जा रज्जं ॥१२॥

निजमूत्रपुरीषं स्वप्ने आकृष्य हस्ताम् । यः किल बुध्यते पुरुषो राज्यश्रीं सोऽपि प्राप्नोति ॥६॥
लिंगभंगशीर्षछेदा नरनारीणां भवन्ति सुखफलकाः । सौभाग्यभोगसंपद धनावहा नूनं स्वप्ने ॥७॥
आरोपयित्वा धनुषं जीवखातुरायमान दिक्चक्रम् । यो हन्ति शत्रु सैन्यं स प्राप्नोति संपदं विपुलम् ॥८॥
गजवृषभशैल प्रासाद वर तरु रोहणं किल प्रशस्तम् । रुदितं विष्ठालेपश्च गम्यगमनं च स्वप्ने ॥९॥
यः किल दक्षिणहस्ते पाण्डुरवर्णेन खाद्यतेऽहिना । लभते सहस्रमनूनं दिनाना मष्टानां मध्ये ॥१०॥
फलगार्भि क्षीरद्रुमं आरूढो तत्र चैव एकाकी । यो बुध्यते स त्वरितं धनऋद्धिं प्राप्नोति स्वप्ने ॥११॥
विमना आमं मांसं पादादिषु तथा नराणां खादन् । प्रतिबुध्यते पञ्चशतं प्राप्नोति शीर्षे यावद् राज्यम् ॥१२॥





For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अइ कूवजलसंचयाओ आरुहइ जो थलं पुरिसो । भयरहिओसोवड्ढइ मेहागुणधारणाइहिं च ॥१३॥
घित्तूण जो विउज्झइ वीणं सुमिणम्मि हरिसपडिहत्थो । कुलरूवसालिण्णं सो कन्नं परिणेइ कयपुन्नो॥१४॥
आसणसयणं जाणं मंदिरवत्थं विभूसणं जस्स । सुमिणंमि दढं दिथई सोपावइ सव्वओ लच्छि ॥१५॥
सुमिणम्मि सुक्कसोणिय मुत्तपुरीसाइं लिहइ जो तुट्ठो । छडिंचसो किलेसोउ मुच्चइ नत्थित संदेहो ॥१६॥
पुव्वुत्तराइ वंच्चइ दिसाइ जो वसइ संगए जाणे । इत्थियमत्थं पावइ सो पुरिसो जीव लोगम्मि ॥१७॥
पज्जलियनयर सेलग्ग सिहरम्मि संठिओ बुद्धो । सुमिणम्मि होइ राया वयणमिणं भद्दबाहुस्स ॥१८॥
निम्मय(ल)करिनाहठिओ जो जलहि तरेइ कहविसुमिणम्मि । तहचेवय पडिबुज्झइ होइ नरिंद न संदेहो ॥१९॥

अति कूपजल संचयाद् आरोहति यः स्थलं पुरुषः । भवरहितः स वर्धते मेधागुण धारणादिभिः ॥१३॥
गृहीत्वा यो विबुध्यते वीणां स्वप्ने हर्ष प्रतिहस्तः । कुलरूवसमानां (सदृशां) स कन्यां परिणयति कृतपुण्यः ॥१४॥
आसन शयन यानं मदिरवस्त्रं विभूसणं यस्य । स्वप्ने दृढं दीयते स प्राप्नोति सर्व तो लक्ष्मीम् ॥१५॥
स्वप्ने शुक्रशोणितमूत्रपुरीषाणि लेढि यस्तुष्टः । छर्दि च स क्लेशाद् मुच्यते नास्त्यत्र संदेहः ॥१६॥
पुर्वोत्तरे ब्रजति दिशायांय बसति संगते याने । इच्छितमर्थं प्राप्णोति सपुरुषा जीवयोगे ॥१७॥
पज्वलित नगर शैलाग्र शिरसि संठिओ बुद्धो । स्वप्ने भवति राजा वचनमिदं भद्रबाहोः ॥१८॥
निर्मक (ल) करि नाथस्थितो यो जलधिं तरति कथमपि स्वप्ने । तथा चैव च प्रतिबुध्यते भवति नरेन्द्रो न संदेहः ॥१९॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वप्नाध्यायः

अंगोवंगसणाहं नहरोम विवज्जियं सरीरं तु । सुमिणम्मि जस्स बुज्झइ सो लच्छि लहइ दइयंच ॥२०॥
सुमिणम्मि जस्स छिज्जइ जीहा असिणावि तिक्खधारेण । रज्जं लहइ नरिंदो सेसावि लहंति लच्छिओ ॥२१॥
छत्तोवाहणखग्गे सुमिणे लद्धूण जाई पंथम्मि । गंतूण एइ तुरियं कयकज्जो नियघगेहम्मि ॥२२॥
नेहभंगे रोगो धणनासो होइ दंतपडणम्मि । संगिह्ल दाढिवानर संतासे भयं खु नरवइणो ॥२३॥
दाहिण दिसाए वच्चइ चित्तूण करम्मि सामला नारी । रत्तंबररत्तविलेपणाय आलिंगए धणियं ॥२४॥
खरकरहतुरिय जाणे आरूढ निहट्ठियाण पडिबुद्धा । पावंति य मरणभये तिन्निवि अहवा महावसणं॥२५॥
अइसुक्क दारुतरुग वालिमसाणेसु जो समारुहइ । सुमिणम्मि सोवि पावइ वसणं पुरिसो सकम्मेहिं॥२६॥

अङ्गोपाङ्ग सनाथं नखरोम विवर्ज्जितं शरीरं तु । स्वप्ने यस्य बुध्यते स लक्ष्मीं लभते दयितां च ॥२०॥
स्वप्ने यस्य छिद्यते जिह्वा असिनापि तीक्ष्ण धारेण । राज्यं लभते नरेन्द्रः शेषा अपि लभन्ते लक्ष्मीः ॥२१॥
छत्रोपानत्खड्गान् स्वप्ने लब्ध्वा याति पथि । गत्वा-एति त्वरितं कृतकार्यो निजकगेहे ॥२२॥
स्नेहभंङ्गे रोगो धननाशो भवति दन्तपतने । दंष्ट्रि वानर-संत्रासे भयं खुनरपतेः ॥२३॥
दक्षिण दिशायां गच्छति गृहीत्वा करे श्यामला नारी । रक्ताम्बर रक्त विलेपना च आलिङ्गतेऽत्यर्थम् ॥२४॥
खरकरभ तूर्य यानं आरूढ निघृष्टानां प्रतिबुद्धा । प्राप्नुवन्ति च मरणभयं त्रिण्यपि-अथवा महाव्यसनम् ॥२५॥
अतिशुष्क दारु तरुकपालि श्मशानेषु यः समारोहति । स्वप्ने सोऽपि प्राप्नोति व्यसनं पुरुषः स्वकर्मभिः ॥२६॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जावय रसोय सुमिणे निवडर गयणानु जस्स गेहम्मि । जलणानु कह विमुक्कं मुसंति चोराउतंगेहं॥२७॥
गुरुपत्थरोवहाणो खायंतो दारुयं बराहेण । बोहिज्जइ जइ सुमिणे तो वच्चइ अंतयघरम्मि ॥२८॥
उट्टोरण खरसूयर निबद्धरहसंठिओहु जो जाइ । दाहिण दिसं हयासो सो पिच्छइ झत्तिजमगेहं ॥२९॥
सुमिणम्मि जस्स गेह मुहजालं नियइ दिवसउ कहवि । अच्छेणय जीवेणय सोमुच्चइ पुन्नपरिहीणो॥३०॥
छारिल्लधाउरत्ता नग्गिंद जटालमुंडमलमइला । भीसणरूवाय तहा सुमिणे दिट्ठाउ पडिसिद्धा ॥३१॥
दत्तकणवीरमाला रत्तं सुत्तं च जस्स अगम्मि । बज्झइ सुमिणम्मि फुडं तं अंगं छिज्जए तस्स ॥३२॥
राइए पढमे जामे सुमिणो संवच्छरम्मि फलकारी । बीयम्मि कुणइ दिट्ठो अट्ठहिं मासेहिं सुहमसुहं॥३३॥

यावकरसश्च स्वप्ने निपतति गगनाद् यस्य गेहे । ज्वलनात् कथमपिमुक्तं मुष्णन्ति चारास्तु तद्गेहम् ॥२७॥
गुरुप्रस्तरोपधानो खादन् दारुकं वराहेन । बुध्यते यदि स्वप्ने ततो गच्छति–अन्तकगृहे ॥२८॥
उष्टोरण खर शूकर निबद्ध रथ संस्थितो हु यो याति । दक्षिणदिशं हताशः स प्रेक्षते झटिति यमगेहम् ॥२९॥
स्वप्ने यस्य गेहे मुहजालं नियई दिवसतकथमाणि । आश्चर्येण च जीवेन च स मुच्यते पुण्यपरि हीणः ॥३०॥
भस्मवदधातुरक्ता नगेन्द्र जटाल मुंडमलमालना । भीषणरूपाश्च तहा स्वप्ने दिष्टास्तु प्रतिसिद्धा ॥३१॥
रक्तकणवीरमाला रक्तं सूत्रं च यस्य–अङ्गे । बध्यते स्वप्ने तदङ्गं छिद्यते तस्य ॥३२॥
राज्याः प्रथमे यामे स्वप्नः संवत्सरे फलकारी । द्वितिये करोति दृष्ट अष्टभिर्मासैः शुभम शुभम् ॥३३॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



राइए तइए यामे तइए मासम्मि कुणइ सुहमसुहं । गोसम्मि दिसालोए दिठो सुमिणो फलं देइ॥३४॥
राञ्या स्तृतीये यामे तृतीये मासे करोति शुभम शुभम् । उषसि? दिशालोको दृष्टः स्वप्नः फलं ददाति ॥३४॥

## इति प्रथमः स्वप्नाध्यायः

किचिसरिच्छाववधं(त्तं) अहमं होइ विवरीयं । तिविहं भणंति सुमिणं तमहं वुच्छ समासेण ॥१॥
अहतंपि वायपित्तोदएण सिंभेणवावि जीवगणे । अणुभूय दिट्ठ चिंतिय जो एणं पिच्छए सुमिणं ॥२॥
एयाणं विवरीयं कहंति उदयट्ठिएण कम्मेण । सुहवसुहफलं वा पिच्छइ ता सच्चयं होइ ॥३॥
अणुभूयदिट्ठचिंताविवज्जितं कहव पिच्छए सुमिणं । तातयवत्थं जायइ उवहायं रक्खमाणस्स ॥४॥
पढमम्मि वासफलया बीए जामम्मि हुंति छम्मासा । तइयंम्मितिमासफला चरमे सज्जफला हुंति ॥५॥

किंचि सदृशापवृत्तं अधमं भवति विपरीतम् । त्रिविधं भणन्ति स्वप्नं तमहं वक्ष्ये समासेन ॥ १ ॥
अथ तदपि वातपित्तोदयेन श्लेष्मेण वाऽपि जीवगणे । अनुभूत दृष्ट चिन्तित योगेन प्रेक्षते स्वप्नम् ॥ २ ॥
एतानां विपरितं कथयन्ति उदय स्थितेन क्रमेण । शुभमशुभफलं वा प्रेक्षते तावत् सत्यं (कं) भवति ॥ ३ ॥
अनुभूत दृष्ट चिन्ता विवर्जितं कथं अवप्रेक्षते स्वप्नम् । तावत्वस्त्रं जायते उपधार्य रक्षतः ॥ ४ ॥
प्रथमे वर्षफलता द्वितीये यामे भवन्ति षड्मासाः । तृतीये मासफलता चरमे सद्यःफला भवन्ति ॥ ५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आरोहणं गोविसकुंजरेसुं पासायसेलग्ग महादुमेसु । विट्ठाणुलेवो रुहयं मयंच अगम्मगम्मं सुविणे सुवन्नं॥६॥
दहिछत्त सुमणचामर वत्थन्नफलंच दीवतंबोलं । संखसुवन्नं मंतं झओय लद्धो धणं देइ ॥७॥
सियछेयम्मि य रज्जं सत्थप्पहारेण अत्थसंजोगं । रुहिरुग्गिरणं सुविणे नवरि नरिंदत्तणमुवेइ ॥८॥
पयपाणं कुंकुमविलेवणं अब्भंगणं च तिलेण । सुमिणं कुणइ य मरणं अहवा रोगुब्भवंगरुयं ॥९॥
असुइपलित्तं तं मज्जपाणयं गमणमागमणयं चेव । सुमिणयं महाफलयं पुव्वायरिएहिं संदिट्ठं ॥१०॥
हसिए रुइयं रुइयम्मि पवसणं जाण होई विवरीयं । दहिछत्त सुमण चामर सयावलोयम्मि सिरिलाभो॥११॥
दाहिणकरम्मि सेयाहि मक्खणे दसणेय रुहिरस्स । रज्जं धणागमं वा लहइय वायं नरिंदस्स ॥१२॥

आरोहणं गोवृषभकुञ्जरेषु प्रासाद शैलाग्र महाद्रुमेषु । विष्ठानुलेपो रुदितं मतं च अगम्यगम्यं स्वप्ने ॥ ६ ॥
दधिछत्र सुमनश्चामर वस्त्रान्नफलं च दीप तांबूलम् । शङ्खसुवर्णमन्त्रं ध्वजश्च लब्धो धनं ददाति ॥ ७ ॥
शिरच्छेदेच राज्यं शस्त्रप्रहारेण अर्थसंयोगम् । रुधिरोद्गिरणं स्वप्ने नवरि नरेन्द्रत्व मुपैति ॥ ८ ॥
पयःपानं कुङ्कुम विलेपनं अभ्यञ्जनं तिलेन । स्वप्न करोतिच मरणम् अथवा रोगोद्भवाङ्गरुतम् ॥ ९ ॥
अशुचि प्रदीप्तं तद् मद्यपानकं गमनमागमनकं चैव । स्वप्नं महाफलकं पूर्वाचार्यैः संदिष्टम् ॥१०॥
हसिते रुदितं रुदिते प्रवसनं जानीहि भवति विपरीतम् । दधिछत्र सुमनश्चामर शतावलोके श्री लाभ ॥११॥
दक्षिणकरे श्वेताहि भक्षणे दशनेच रुधिरस्य । राज्यं धनागमं वा लभते च वासं नरेन्द्रस्य ॥१२॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सिरे सयसहस्सं तु सहस्सं बाहुभक्खणे । पाए पंचसओ लाभो माणुसामिसभक्खणे ॥१३॥
दारग्गल सिज्जासार भंजणे दारिया विणा सिज्जा । पियमाइपुत्तमरणं अंगछिज्जं वियाणिज्जा ॥१४॥
सिंगीणं दाढीणं उवद्दवो कुणइ नूणरायभयं । पुत्तो य पइट्ठावा नियय भुया पाश बंधेसु ॥१५॥
सुमिणेय चंदपियणे नाणमहिज्जेइ सूरापियणे य । पावेइ रज्जलाभं रविमंडल मंदपुन्नो वि ॥१६॥
सायर पियणेय पावेइ मेइणिं तरणम्मि य गयं दुक्खं । रत्तवसणोय सुमिणे गायंतो निच्छयं मरइ ॥१७॥
गायंतं नच्चतं हसमाणं चुप्पडं व अप्पाणं । दणट्ठू सुमिणसमए चिंतेसु उवट्ठियं अशिवं ॥१८॥
नइसरतरणं तरवरविलग्गणं गोविसम्मि वा चडणं । उत्तुंगपव्वयारोहणं च पिच्छंति सुहभागी ॥१९॥

शिरसि शतसहस्रं तु सहस्रं बाहुभक्षणे । पादे पंचशतो लाभो मानुषामिषभक्षणे ॥१३॥
द्वारार्गल शय्या सारभञ्जने दारिका विनश्येत् पितृमातृपुत्र मरणं अङ्गच्छेद्यं विजानीयात् ॥१४॥
शृङ्गीनां दंष्ट्रिणां उपद्रवः करोति नूनं राजभयम् । पुत्रश्च प्रतिष्ठा वा निजक भुजापाश बन्धेषु ॥१५॥
स्वप्ने च चन्द्रपाने ज्ञानमध्येति सूर पाने च । प्राप्नोति राज्यलाभं रविमण्डलमन्द पुण्योऽपि ॥१६॥
सागर पाने च प्राप्नोति मेदिनीं तरणे च गतं दुःखम् । रक्तवसनश्च स्वप्ने गायन् निश्चयं म्रियते ॥१७॥
गायन्तं नृत्यन्तं हसमानं लिप्तं च आत्मानम् । दृष्ट्वा स्वप्नसमये चिन्तय-उपस्थितं अशिवम् ॥१८॥
नदीसरस्तरणं तरुवर-विलगनं गो वृषे वा चटनम् । उत्तुङ्ग पर्वतारोहणं च प्रेक्षन्ते सुखभागिनः ॥१९॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मणुयस्स सेयवत्थस्स दंसणे सया कालं । रत्तवडखवणयाणं मरणं पुण दंसणं होइ ॥२०॥
गयवसहहंससारस सिहिमच्छजुएण मंसहत्थेण । सुमिणम्मि दिट्ठमित्ते होइ धणं सुक्खसंपत्ती ॥२१॥
आसणे सयणे जाणे सरीरे वाहणे हेगी । चलमाणे विबुज्झिज्जा सिरीतस्स समंतओ ॥२२॥
करहतुरंगे रिच्छम्मि वा ससे देव हसिव कंपे वा । मरणं महाभयं वा सुमिणेय दिट्ठे वियाणाहि॥२३॥
पल्लंक कमलचंदन वसणजुए देवपूयन्हवणे वा । सुहसाहुदंसणम्मिय उत्तमफल संपया रुग्गं ॥२४॥
इय पुव्व समज्जिय पुन्नपाव परिणामफलाविसेसेण । पिच्छंति तारिसं चिय जारिसयं वेइयव्वंति ॥२५॥
गयणम्मि गहा सुयणम्मि सुमिणया सुमिणया वणग्गेसु । तहवाहरंतिपुरिसं जह दिट्ठं पुव्वकम्मेहिं॥२६॥

मनुजस्य श्वेतवस्त्रस्य दर्शने सदा कालम् । रक्तपट क्षपणता च मरणं पुनो दर्शनं भवति ॥२०॥
गजवृषभहंस सारस शिखिमत्स्य युगेन मांस हस्तेन । स्वप्ने दृष्टमात्रे भवति धनं सौख्यसंप्राप्तिः ॥२१॥
आसने शयने याने शरीरे वाहने गृहे । चलन्नपि बुध्येत् श्रीस्तस्य समन्ततः ॥२२॥
करभतुरङ्गे ऋक्षे वा शशे देवहसित कम्पे वा । मरणं महाभयं वा स्वप्ने च दृष्टे विजानी हि ॥२३॥
पल्लंक कमलचंदण वसणजुए देवपूयन्हवणे वा ! सुभ्रसाहु दंसणम्भिय उत्तमफल संपदारोग्यम् ॥२४॥
इति पूर्व समर्जित पुण्य पाप परिणाम फल विशेषेण । प्रेक्षन्ते तादृशकमेव यादृशकं वेदितव्यमिति ॥२५॥
गगने ग्रहाः स्वपने स्वप्नाः शकुनका वनाग्रेषु । तथा वा हरन्ति पुरुषं यथा (दृष्टं) दिष्टं पुर्व कर्मभिः ॥२६॥

॥ द्वितीय स्वप्नाध्यायः समाप्त ॥



For Private And Personal Use Only